# INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES

ISSN 2277 – 9809 (online)
ISSN 2348 - 9359 (Print)

*An Internationally Indexed Peer Reviewed & Refereed Journal*

www.IRJMSH.com
www.isarasolutions.com

Published by iSaRa Solutions

# श्रीमद्वाल्मीकिरामायणे श्रीसीतायाः माधुर्यभक्तिः

**SUDHARSAN K**
RESEARCH SCHOLAR
THE MADRAS SANSKRIT COLLEGE,
MYLAPORE, CHENNAI -600004

## सारांशः

अस्मिन् शोधलेखे श्रीमद्वाल्मीकिरामायणे प्रतिपादितायाः श्रीसीतायाः श्रीरामविषयकायाः माधुर्यभक्तेः रसशास्त्रीयदृष्ट्या समीक्षणं कृतम्। प्रथमतः भरतमुनेः नवरससिद्धान्तस्य तथा मधुसूदनसरस्वत्यादिभिः प्रतिपादितस्य भक्तिरसस्य स्वरूपं विवेचितम्। ततः भक्तेः दशमरसत्वं, तस्य विभावानुभावव्यभिचारिभावादिसामग्री च निरूपिता। अनन्तरं माधुर्यभक्तेः स्वरूपं रूपगोस्वामिप्रणीतभक्तिरसामृतसिन्ध्वादिग्रन्थानां प्रकाशे विविच्य, श्रीमद्वाल्मीकिरामायणस्य आरण्यकाण्डे, सुन्दरकाण्डे च प्राप्तानां प्रसङ्गानामाधारेण श्रीसीतायाः श्रीरामे अनन्यप्रेम, अनन्याश्रयता, आत्मसमर्पणभावः, विरहव्यथा च प्रतिपादिता। एतैः प्रमाणैः श्रीसीतायाः भक्तिः केवलं लौकिकदाम्पत्यप्रेम न, अपि तु भगवद्विषयिणी माधुर्यप्रधानभक्तिरिति सिध्यति। अतः वाल्मीकिरामायणे माधुर्यभक्तेः उत्कृष्टं स्वरूपं श्रीसीतायाः चरित्रे स्फुटतया प्रकटितमिति निष्कर्षः।

## उपोद्घातः

भरत मुनीना प्रसिद्धतया श्टङ्गार-वीर-हास्येत्यादी नवरससिद्धान्तस्यैव स्वीकारात् भक्तिरसः अस्ति वा इति शङ्का जायते । तन्निवारणाय परम वेदान्ति मधुसूदन-सरस्वती आचार्यः भक्तेः रसत्वव्यवस्थापनाय श्रीभगवत्भक्ति-रसायनम् इत्येकं ग्रन्थमेव विरचिनवन्तः । वस्तुता नव-रसेष्वपि भक्तिरसस्य अन्तः करण अशक्तत्वात् भक्तेः रसत्वाङ्गीकाराय बहवः युक्तयः सन्त्येव । अतः भक्तिरस स्वीकारेण रसः दशधा भवति ।

- भक्तिरस प्रवर्तकाः

आचार्य मधुसूदन सरस्वति, रूप गोस्वामी, श्री श्रीधर अय्यावाल, श्री भगवन्नाम बोधेन्द्र सरस्वति स्वामिनः, श्री श्री कृष्णप्रेमिगुरुचरण प्रभृतयः महान्तः

- भक्तेः लक्षणम्

द्रुतस्य भगद्धर्मात् धारावाहिकतां गता ।

सर्वेशे मनसो वृत्तिः भक्तिरित्यभिधीयते ।।[1]

- भक्तेः पञ्चविधम्

दास्यभक्तिः , सख्यभक्तिः, माधुर्यभक्तिः, वात्सल्यभक्तिः एवं शान्तभक्तिः

## माधुर्यभक्तिरसः प्रस्तावनम्

श्रीमद्वाल्मीकिरामायणे बहुत्र स्थलेषु श्रीसीतायाः श्रीरामस्योपरि विद्यमान माधुर्यभक्तिः अतीव स्पष्टतया दृश्यते, स्वयं सीतायाः वचनेन वा अन्यैः कथनेन वा ।

अथ मधुररसे रूपमाधुर्य लीलामाधुर्य- प्रेममाधुर्यसिन्धुः श्रीकृष्णो विषयालम्बनः। प्रेयसीगणः आश्रयालम्बनः । मुरलीरव- वसन्त- कोकिलनाद- नवमेघमयूरकण्ठादिदर्शनाद्याः उद्दीपन विभावाः । कटाक्ष-हास्यादायोऽनुभावाः सर्व एव सात्विकाः सुदीप्तपर्यन्ताः निर्वेदाद्याः सर्वे आलस्यौग्य्ररहिताः संचारिणः । प्रियतारतिः स्थायी भावः । प्रेमस्नेहरागाद्याः श्रीलोज्ज्वलनीलमण्युक्ताः सर्व एव भवन्ति । इति मधुररसः ।

"रसो वै सः"[2] इत्यादि श्रुतिवाक्य प्रमाणेन ज्ञायते यत् रसः ब्रह्मानन्द सहोदरः इति । रस विभजने मतद्वयमस्ति । यथा नवरसः एवं भक्तिरसं मिलित्वा दशरसः इति । आलङ्कारिपूवाचार्येन भरतमुनिना प्रसिद्धतया श्रृङ्गार-वीर-हास्येत्यादि नवरससिद्धान्तस्यैव स्वीकारः कृतः । तन्मत संप्रदायगोरवेन मम्मटाचार्यप्रभृतयः केचित् आलङ्कारिकाः भक्तिर्नाम कश्चित् भावविशेषः इत्याहुः । तथाचोक्तं "रतिर्देवादिविषयाव्याभिचारी तथाञ्चितः"[3] भावः इति ।

परन्तु मधुसूदनसरस्वती- प्रभृतयः आचार्याः भक्ते रसत्वव्यस्थापनाय श्रीभगवद्भक्तिरसायनम्, श्रीभक्तिरसामृतसिन्धुः इत्यादयः ग्रन्थाः विरचितवन्तः । वस्तुतोऽपि भक्तिरसस्य विभावानुभावादिसामग्री अस्ति । भक्तिरसोऽयं भगवदालम्बनः रोमाञ्च-अश्रुपातादिभिः, अनुभावितः, हर्षादिभिः परिपोषितः , श्रीमद्भागवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभाव्यमानः अनुरागस्थायिकाः । न चासौ शान्तरसे अन्तर्भवति, वैराग्यविरुद्धस्य अनुरागस्य शान्तरसे स्थायित्वेन अवस्थानासम्भवात् । किञ्च देवादिविषयरतिः एवं कान्तादि विषयक रतिः इति उभयोः समता नास्ति। यतोऽहि कान्तादि विषयकरतिः क्षणिकानन्द दायकः परं भगवद्विषयक रतिः नित्यपरिपूर्णानन्ददायकः । तदुक्तं भक्तिरसायने

**"कान्तादिविषया वा ये रसाद्यास्तत्र नेहदृशम् ।**

**रसत्वं पुष्यते पूर्णसुखास्पर्शित्वकारणात् ॥**

---

[1] भगवद्भक्तिरसायनम् -1 -3
[2] तैत्तिरीयोपनिषद् (ब्रह्मानन्दवल्ली) - 7
[3] साहित्यदर्पणम् - 3

**परिपूर्णरसा क्षुद्ररसेभ्यो भगवद्रतिः ।**

**खद्योतेभ्य इवादित्यप्रभेव बलवत्तरा"** [4]**॥ इति ।।**

अतः भक्तेः दशम-रसत्वाङ्गीकार एव साधुः ।

किञ्च तादृश भक्तिरसः पञ्चधा भवति तद्यथा, दास्यभक्तिरसः, सख्यभक्तिरसः, वात्सल्यभक्तिरसः, माधुर्यभक्तिरसः, शान्तभक्तिरसः इति। अत्र स्वीकृत शीर्शकानुसारेण माधुर्यभक्तिरस स्वरूपं वच्मि ।

## श्रीसीतायाः माधुर्यभक्तिः

श्रीमद्वालमीकिरामायणे श्रीसीतारामयोः माधुर्यभक्तिः बहुषु स्थलेषु दृश्यते । तत्र स्थालीपुलाकन्यायेन दिङ्मात्रप्रदर्शनं क्रियते । यथा

**"इयं सा यत्कृते रामश्चतुर्भिः परितप्यते ।**
**कारुण्येनानृशंस्येन शोकेन मदनेन च ॥**
**स्त्री प्रनष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः ।**
**पत्नी नष्टेति शोकेन प्रियेति मदनेन च"** [5]।।

इत्यत्र , श्रीरामः श्रीसीतायाः वियोगेन कथं दुःखमनुभवति इति सुन्दरकाण्डे भगवतः हनूमतः वचनेन ज्ञायते । अत्र कारणचतुष्टयमुच्यते, "स्त्रीप्रण्ष्टेति कारुण्यात्" स्त्रियः एताहृश दुःखदशा जाता इति कारुण्येण, मां विश्वासः कृत्वा मया साकं स्व राज्यसुखमपि परित्यज्य सीता आगतवति, तस्मात् आश्रिता न रक्षिता इति प्रेमया,"अर्धो वा एष आत्मनो यत्पत्नी" [6] इति श्रृत्युक्तरीत्य आत्मार्धभूता सहधर्मचरी पत्नी नष्टेति शोकेन, परमरूपलावन्यादिमती परमसुखसाधनभूता प्रिया नष्टेति मदनेन इति कारुण्येन, प्रेम्ना, शोकेन, एवं मदनेन इति कारणचतुष्टयेन सर्वेन्द्रियपरि-तापः श्रीरामेन प्राप्तः । इत्यत्र श्रीसीतायाः माधुर्यभक्ति पुष्कलतया ज्ञायते ।

किञ्च आरण्यकण्डे श्रीसीता रावणेन अपहृता इति अज्ञात्वा श्रीरामः श्रीसीतान्वेशनं कुर्वन् प्रलपति तद्यथा-

**"वृक्षाद्वृक्षं प्रधावन्सगिरेश्चाद्रिं नदान्नदीम्।**
**बभूव विलपन्रामश्शोकार्णवपरिप्लुतः।।**

---

[4] भगवद्भक्तिरसायनम् – 2 – 76,77
[5] वाल्मीकिरामायणम् – 5 – 49,50
[6] शतपथ ब्राह्मणम् — 5.2.1.10

**अपि कच्चित्वया हृष्टा सा कदम्बाप्रिया मम ।**

**कदम्ब यदि जानीषे शंस सीतां शुभाननाम्[7]" ।।**

तत्र मनुष्यभाव घोरवने धीरोदात्तनायकः शोकार्णवपरिप्लुतः श्रीरामः वृक्षात्-वृक्षं, अचलात्-अचलं, नदात्-नदीं प्रदावन् वृक्षाः अचेतनमिति ज्ञात्वा अपि पृच्छति, यथा हे कदम्ब वृक्ष! त्वयि प्रीतीयुक्तां सीतां यदि त्वया दृष्टावा तर्हि मह्यं वद इति । अपि च "शंसस्व यदि वा हृष्टा बिल्व बिल्वोपमस्तनी[8]" इति बिल्ववृक्षं दृष्ट्वा सीता कुत्रेति पृच्छति ।

**"अथवा मृगशाबाक्षीं मृग जानासि मैथिलीम्।**

**मृगविप्रेक्षणी कान्ता मृगीभिः सहिता भवेत्"।।[9]**

इति तश्र वनस्थ मृगगजशार्दूलादिकं दृष्ट्वा सीतां दृष्टः वा तर्हि कथय मह्म् इति विलपन् कान्तान्वेषणतत्परः श्रीरामः क्वचित् वेगात् उद्भ्रमते, क्वचित् बलात् विभ्रमते क्वचित् मत्तः इव आभाति । इत्यत्र श्रीरामान्वेशनेन ज्ञायते यत् श्रीसीता स्वकान्तः श्रीरामोपरि कीदृशी माधुर्यभक्तिमतीति ।

## उपसंहारः

रसशास्त्रीयदृष्ट्या विचार्यमाणे सीतायाः रामविषयकभक्तौ आलम्बनविभावरूपेण श्रीरामः, आश्रयरूपेण श्रीसीता, उद्दीपनविभावरूपेण रामगुणाः तथा स्मृतयः, अनुभावरूपेण अश्रुपातादयः, व्यभिचारिभावरूपेण विषाद, दैन्य, उत्कण्ठा, निराशा इत्यादयः भावाः स्पष्टतया दृश्यन्ते। एतेषां समन्वयेन माधुर्यभक्तिरसस्य परिपाकः भवति।

अतः श्रीमद्वाल्मीकिरामायणस्य अध्ययनात् ज्ञायते यत् श्रीसीतायाः चरित्रं केवलं पतिव्रताधर्मस्य आदर्शरूपं न, अपि तु भगवद्भक्तेः परमोत्कृष्टं उदाहरणम् अस्ति। तस्याः प्रेम्णि लौकिकतत्त्वस्य अतिक्रमणं कृत्वा दिव्यत्वं, अनन्यता, आत्मनिवेदनं च प्रकाशते। अतः वाल्मीकिरामायणे श्रीसीतायाः माध्यमेन माधुर्यभक्तेः सर्वोत्तमं, गम्भीरं, आध्यात्मिकं च स्वरूपं सुस्पष्टतया प्रतिपादितमिति निष्कर्षः।

## Bibliography

1. श्रीमद्वाल्मीकिरामायणम्

Published by-

[7]वाल्मीकिरामायणम् – 3- 60- 11,12.

[8] वाल्मीकिरामायणम् – 3- 60- 13

[9] वाल्मीकिरामायणम् – 3- 60- 23

SRI VIGNESHWARA VENKATESHWARA TRUST,

214, T.T.K. ROAD, CHENNAI-600018

2. श्रीभगवद्भक्तिरसायनम्.

CHOWKAMBA VIDYABAVAN,

1069, VARANASI- 221001

3. मन्त्रपुष्पम्

RAMAKRISHNA MATH

12TH ROAD, KHAR (WEST),

MUMBAI-400052

## ISARA INSTITUTE OF MANAGEMENT & PROFESSIONAL STUDIES




R S E A R C H G A T E W A Y







A R O G Y A M O N L I N E

## PARIVARTAN PSYCHOLOGY CENTER






**भारतीय भाषा, शिक्षा, साहित्य एवं शोध**

**ISSN 2321 – 9726**

**WWW.BHARTIYASHODH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SCIENCE & TECHNOLOGY**

**ISSN – 2250 – 1959 (0) 2348 – 9367 (P)**

**WWW.IRJMST.COM**

**INTERNATIONAL RESEARCH JOURNAL OF COMMERCE, ARTS AND SCIENCE**

**ISSN 2319 – 9202**

**WWW.CASIRJ.COM**

**INTERNATIONAL RESEARCH JOURNAL OF MANAGEMENT SOCIOLOGY & HUMANITIES**

**ISSN 2277 – 9809 (0) 2348 - 9359 (P)**

**WWW.IRJMSH.COM**

**INTERNATIONAL RESEARCH JOURNAL OF SCIENCE ENGINEERING AND TECHNOLOGY**

**ISSN 2454-3195 (online)**

**WWW.RJSET.COM**

**INTEGRATED RESEARCH JOURNAL OF MANAGEMENT, SCIENCE AND INNOVATION**

**ISSN 2582-5445**

**WWW.IRJMSI.COM**

**JOURNAL OF LEGAL STUDIES,POLITICS AND ECONOMICS RESEARCH**

**WWW.JLPER.COM**